अ॰ सू॰
२

श्वर्विंचिषु। द्विर्वचनेचि। अदर्शनंलोपः॥१॥ प्रत्ययस्यलुक्श्लुलुपः। प्रत्ययलोपेप्रत्ययलक्षणं। न
लुमतांगस्य। अचोंत्यादिटि। अलोंत्यात्पूर्वउपधा। तस्मिन्नितिनिर्दिष्टेपूर्वस्य। तस्मादित्युत्तरस्य।
स्वंरूपंशब्दस्याशब्दसंज्ञा। अणुदित्सवर्णस्यचाप्रत्ययः। तपरस्तत्कालस्य। आदिरंत्येन
सहेता। येनविधिस्तदंतस्य। वृद्धिर्यस्याचामादिस्तद्वृद्धं। त्यदादीनिच। एङ्प्राचांदेशे॥४॥ इद्धि
राधंतवदव्ययीभावः प्रत्ययस्यलुक्पंचदश॥ ॥इतिपाणिनीसूत्रेप्रथमाध्यायस्यप्रथमःपा
दः॥ ॥गाङ्कुटादिभ्योञ्णिन्ङित्। विजइट्। विभाषोर्णोः। सार्वधातुकमपित्। असंयोगाल्लिट्कि
त्। इंधिभवतिभ्यांच। मृडमृदगुधकुषक्लिशवदवसः क्त्वा। रुदविदमुषग्रहिस्वपिप्रच्छःसंश्च। श्रीः
इकोझल्। हलंताच्च। लिङ्सिचावात्मनेपदेषु। उश्च। वागमः। हनःसिच्। यमोगंधने। विभाषोप
यमने। स्थाघ्वोरिच्च। नक्त्वासेट्। निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः। मृषस्तितिक्षायां॥१॥ उदु

२

ष्ठां तः षट् । ङति च । ऋकवत् निष्ठा । सर्वादीनि सर्वनामानि । विभाषा दिक् समासे
बहुव्रीहौ । न बहुव्रीहौ । तृतीयासमासे । द्वंद्वे च । विभाषा जसि । प्रथमचरमतया
ल्पार्द्धकतिपयनेमाश्च । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञा
यां । स्वमज्ञातिधनाख्यायां । अंतरं बहिर्योगोपसंव्यानयोः । स्वरादिनिपातमव्ययं । त
द्धितश्चासर्वविभक्तिः । कृन्मेजंतः । क्त्वातोसुन्कसुनः ॥ २ ॥ अव्ययीभावश्च । शि स
र्वनामस्थानं । सुडनपुंसकस्य । न वेति विभाषा । इग्यणः संप्रसारणं । आद्यंतौ टकि
तौ । मिदचोंत्यात्परः । एच इग्घ्रस्वादेशे । षष्ठी स्थानेयोगा । स्थानेंतरतमः । उरण् रप
रः । अलोंत्यस्य । ङिच्च । आदेः परस्य । अनेकाल्शित्सर्वस्य । स्थानिवदादेशोनल्वि
धौ । अचः परस्मिन् पूर्वविधौ । न पदांतद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घज

२अ०पा०३ ८

चूत्तरपदाजाहियुक्ते।षष्ठ्यतसर्थप्रत्ययेन।एनया द्वितीया।पृथग्विनानानाभिस्तृतीयान्य
तरस्यां।करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य।दूरांतिकार्थैः षष्ठ्यन्यतरस्यां।
दूरांतिकार्थेभ्यो द्वितीया च।सप्तम्यधिकरणे च।यस्य च भावेन भावलक्षणं।षष्ठी चानादरे।स्वा
मीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च।आयुक्तकुशलाभ्यां चासेवायां॥२॥यतश्च निर्द्धा
रणं।पंचमी विभक्ते।साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः।प्रसितोत्सुकाभ्यां तृतीया च।नक्षत्रे
च लुपि।प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा।संबोधने च।सामंत्रितं।एकवचनं संबुद्धिः।
षष्ठी शेषे।ज्ञोविदर्थस्य करणे।अधीगर्थदयेशां कर्मणि।कृञः प्रतियत्ने।रुजार्थानां भाववचना
नामज्वरेः।आशिषि नाथः।जासिनिप्रहणनाटक्राथपिषां हिंसायां।व्यवहृपणोः समर्थयोः।

श्रीः
८

श्रीवेदव्यासायनमः ॥ अनभिहिते । कर्म्मणि द्वितीया । तृतीयाच होश्छंदसि । अंतरांतरेणयुक्ते ।
कालाध्वनोरत्यंतसंयोगे । अपवर्गे तृतीया । सप्तमीपंचम्यौ कारकमध्ये । कर्मप्रवचनीययुक्ते
द्वितीया । यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी । पंचम्यपाङ्परिभिः । प्रतिनिधिप्रतिदा
नेच यस्मात् । गत्यर्थकर्म्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि । चतुर्थी संप्रदाने । क्रिया
र्थोपपदस्यच कर्म्मणि स्थानिनः । तुमर्थाच्च भाववचनात् । नमः स्वस्तिस्वाहास्वधालंवषड्यो
गाच्च । मन्यकर्म्मण्यनादरे विभाषाप्राणिषु । कर्त्तृकरणयोस्तृतीया । सहयुक्तेप्रधाने । येनांग
विकारः ॥१॥ इत्थंभूतलक्षणे । संज्ञोन्यतरस्यांकर्म्मणि । हेतौ । अकर्त्तर्य्यृणे पंचमी । विभाषागु
णेऽस्त्रियां । षष्ठीहेतुप्रयोगे । सर्वनाम्नस्तृतीयाच । अपादानेपंचमी । अन्यारादितरर्त्तेदिक्छब्दा

२अ०स्०४ १

प्रभृतीनि च।विभाषा वृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तरा
णां।विप्रतिषिद्धं चानधिकरणवाचि।नदधिपर्यस्वादीनि।अधिकरणैतावत्वे च।विभाषा
समीपे।स नपुंसकं।अव्ययीभावश्च।तत्पुरुषोनञ्कर्मधारयः।संज्ञायां कंथोशीन
रेषु॥१॥उपज्ञोपक्रमं तदाद्याचिख्यासायां।छाया बाहुल्ये।सभाराजामनुष्यपूर्वा।अशा
ला च।विभाषा सेनासुराछायाशालानिशानां।परवल्लिंगं द्वंद्वतत्पुरुषयोः।पूर्ववदश्व
वडवौ।हेमंतशिशिरावहोरात्रे च छंदसि।रात्राह्नाहाः पुंसि।अपथं नपुंसकं।अर्द्धर्चाः
पुंसि च।इदमोन्वादेशेशनुदात्तस्तृतीयादौ।एतदस्त्रतसोस्त्रतसौ चानुदात्तौ।द्वितीया
टौस्स्वेनः।आर्द्धधातुके।अदोजग्धिर्ल्यप्ति किति।लुङ्सनोर्घस्लृ।घञपोश्च।बहु
लं छंदसि।लिट्यन्यतरस्यां॥२॥वेञो वयिः।हनो वध लिङि।लुङि च।आत्मनेपदेष्वन्यतरस्यां।

३

श्री ६

दिवस्तदर्थस्य।विभाषोपसर्गे।द्वितीयाब्राह्मणे॥३॥प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने।चतुर्थ्यर्थे
बहुलं छंदसि।यजेश्च करणे।कृत्वोर्थप्रयोगे कालेऽधिकरणे।कर्त्तृकर्मणोः कृति।उभयप्राप्तौ कर्म
णि।क्तस्य च वर्त्तमाने।अधिकरणवाचिनश्च।नलोकाव्ययनिष्ठाखलर्थतृनां।अकेनोर्भविष्यदा
धमर्ण्ययोः।कृत्यानां कर्त्तरि वा।तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां।चतुर्थी चाशिष्या
युष्यमद्रभद्रकुशलसुखार्थहितैः॥४॥अनभिहितइत्थंभूतलक्षणप्रेष्यब्रुवोस्त्रयोदश॥ ॥इति
पाणिनिसूत्रे द्वितीयाध्यायस्य तृतीयः पादः॥ ॥२॥३॥ ॥श्रीनिवासाय मंगलं॥ ॥२
श्रीवेदव्यासाय नमः॥द्विगुरेकवचनं।द्वंद्वश्च प्राणितूर्य्यसेनांगानां।अनुवादे चरणानां।अध्व
र्य्युक्रतुरनपुंसकं।अध्ययनतोऽविप्रकृष्टाख्यानां।जातिरप्राणिनां।विशिष्टलिंगो नदीदे
शोऽग्रामाः।क्षुद्रजंतवः।येषां च विरोधः शाश्वतिकः।शूद्राणामनिरवसितानां।गवाश्व

३अ०सू१
११

पदेषु। सर्त्तिशास्त्यर्त्तिभ्यश्च। इरितो वा। जॄस्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचुश्विभ्यश्च। कृमृदृ
रुहिभ्यश्छंदसि। चिण्ते पदः॥३॥ दीपजनबुधपूरितायिप्यायिभ्योन्यतरस्यां। अचः कर्म्मकर्त्त
रि। दुहश्च। न रुधः। तपोनुतापे च। चिण्भावकर्म्मणोः। सार्वधातुके यक्। कर्त्तरि शप्। दिवादिभ्यः
श्यन्। वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः। यसोनुपसर्गात्। संयसश्च। स्वादिभ्यः श्नुः। श्रु
वः शृ च। अक्षोन्यतरस्यां। तनूकरणे तक्षः। तुदादिभ्यः शः। रुधादिभ्यः श्नम्। तनादिकृञ्भ्य उः। धि
न्विकृण्व्योरच॥४॥ क्र्यादिभ्यः श्ना। स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्भ्यः श्नुश्च। हलः श्नः शानज्झौ।
छंदसि शायजपि। व्यत्ययो बहुलं। लिङ्याशिष्यङ्। कर्म्मवत्कर्म्मणा तुल्यक्रियः। तपस्तपः कर्म
कस्यैव। न दुहस्नुनमां यक्चिणौ॥ कुषिरजोः प्राचां श्यन् परस्मैपदं च। धातोः। तत्रोपपदं सप्त
मीस्थं। कृदतिङ्। वासरूपोस्त्रियां। कृत्याः प्राङ्ण्वुलः। तव्यत्तव्यानीयरः। अचो यत्। पोरदु
पधात्।

५

धा
त्रीः
११

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायां सत्यापपाशरूपवीणातूलश्लोकसेनालोम
त्वचवर्म्मवर्णचूर्णचुरादिभ्यो णिच् । हेतुमति च । कंड्वादिभ्यो यक् । गुपूधूपविच्छिपणिपनिभ्य आ
यः । ऋतेरीयङ् । कमेर्णिङ् । आयादय आर्द्धधातुके वा । सनाद्यंता धातवः । स्यतासी लृलुटोः ।
सिब्बहुलं लेटि । कास्प्रत्ययादाममंत्रे लिटि । इजादेश्च गुरुमतोऽनृच्छः । दयायासश्च । उषवि
दजागृभ्योऽन्यतरस्यां । भीह्रीभृहुवां श्लुवच्च । कृञ् चानुप्रयुज्यते लिटि ॥२॥ विदांकुर्वंत्वित्य
न्यतरस्यां । अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति छं
दसि । च्लि लुङि । च्लेः सिच् । शल इगुपधादनिटः क्सः । श्लिष आलिंगने । न दृशः । णिश्रिद्रुस्रुभ्यः
कर्त्तरि चङ् । विभाषा धेट्श्व्योः । गुपेश्छंदसि । नोनयतिध्वनयत्येलयत्यर्द्दयतिभ्यः । अस्यति
वक्तिख्यातिभ्योऽङ् । लिपिसिचिह्वश्च । आत्मनेपदेष्वन्यतरस्यां । पुषादिद्युताद्लृदितः परस्मैप

३अ०सू०१
१२

प्रणाय्योसंमतौ।पाय्यसान्नाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु।क्रतौकुंडपा
य्यसंचाय्यौ।अग्नौपरिचाय्योपचाय्यसमूह्याः।चित्याग्निचित्येच।ण्वुल्तृचौ।नंदिग्रहिपचादि
भ्योल्युणिन्यचः।इगुपधज्ञाप्रीकिरःकः।आतश्चोपसर्गे।पाघ्राध्माधेट्दृशःशः।अनुपसर्गा
ल्लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च।ददातिदधात्योर्विभाषा।ज्वलितिकसंते
भ्योणः॥७॥श्याद्व्यधास्रुसंस्रवतीणवसावहृलिहश्लिषश्वसश्च।दुन्योरनुपसर्गे।विभाषा
ग्रहः।गेहेकः।शिल्पिनिष्वुन्।गस्थकन्।ण्युट्च।हश्चव्रीहिकालयोः।प्रुसृल्वःसमभिहारेवुन्।
आशिषिच॥८॥जल्पयेर्मुंडविदांदीपजनक्वादिभ्योऽबधयुग्यंश्यादृश॥ ॥इतिपाणि
निसूत्रेतृतीयाध्यायस्यप्रथमःपादः॥ ॥३॥१॥ ॥श्रीकृष्णार्पणमस्तुश्रीः॥ ॥
श्रीवेदव्यासायनमः॥कर्मण्यण्।ह्वावामश्च।आतोनुपसर्गेकः।सुपिस्थः।तुंदशोकयोः १२

5

शकिसहोश्च।गदमदचरयमश्चानुपसर्गे॥५॥अवद्यपण्यवर्य्यागर्ह्यपणितव्यानिरोधेषु।वह्यंक
रणं।अर्य्यः स्वामिवैश्ययोः।उपसर्या काल्याप्रजने।अजर्य्यं संगतं।वदः सुपिक्यप् च।भुवो भावे।
हनस्त च।एतिस्तुशास्वृदृजुषः क्यप्।ऋदुपधाच्चाक्लृपिचृतेः।ई च खनः।भृञोऽसंज्ञायां।मृजेर्वि
भाषा।राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः।भिद्योद्ध्यौ नदे।पुष्यसिद्ध्यौ नक्षत्रे।
विपूयविनीयजित्या मुंजकल्कहलिषु।प्रत्यपिभ्यां ग्रहेश्छंदसि।पदास्वैरिबाह्यापक्ष्येषु च।वि
भाषा कृवृषोः॥६॥युग्यं च पत्रे।अमावस्यदन्यतरस्यां।छंदसि निष्टर्क्यदेवहूयप्रणीयोन्नीयो
च्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योप
चाय्यपृडानि।ऋहलोर्ण्यत्।ओरावश्यके।आसुयुवपिरपिलपित्रपिचमश्च।आनाय्योऽनित्ये।

परिमृजापनुदोः ।प्रेदाज्ञः ।समिख्यः ।गापोष्टक् ।हरतेरनुद्यमनेऽच् ।वयसि च ।आङि ताच्छील्ये ।
अर्हः ।स्तंबकर्णयोरमिजपोः ।शमि धातोः संज्ञायां ।अधिकरणे शेतेः ।चरेष्टः ।भिक्षासेनाद
येषु च ।पुरोऽग्रतोऽग्रेषु सर्त्तेः ।पूर्वे कर्त्तरि ।कृञो हेतुताच्छील्यानुलोम्येषु ।दिवावि भानिशा
नंताध प्रभाभास्करांतादिबहूनांदीकिंलिपिलिबिबलिभक्तिकर्त्तृचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्ध
नुररुष्षु ।कर्म्मणि भृतौ ।न शब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु ।स्तंबशकृतोरिन् ।हर
तेर्दृतिनाथयोः पशौ ।फलेग्रहिरात्मंभरिश्च ।छंदसि वनसनरक्षिमथां ।एजेः खश् ।नासिकास्त
नयोर्ध्माधेटोः ।नाडीमुष्ट्योश्च ।उदि कूले रुजिवहोः ।वहाभ्रे लिहः ।परिमाणे पचः ।मितनखे च ।वि
ध्वरुषोस्तुदः ।असूर्यललाटयोर्दृशितपोः ।उग्रंपश्येरंमदपाणिंधमाश्च ।प्रियवशे वदः खच् ।द्वि
षत्परयोस्तापेः ।वाचि यमो व्रते ॥२॥ पूःसर्वयोर्दारिसहोः ।सर्वकूलाभ्रकरीषेषु कषः ।मेघर्त्तिभ

३अ०सू१ येषुकृञः।क्षेमप्रियमद्रेण्च।आशितेभुवःकरणभावयोः।संज्ञायांभृतॄवृजिधारिसहितपिदमः।
१२ गमश्च।अंतात्यंताध्वदूरपारसर्वानंतेषुडः।आशिषिहनः।अपेक्लेशतमसोः।कुमारशीर्षयो
र्णिनिः।लक्षणेजायापत्योष्टक्।अमनुष्यकर्तृकेच।शक्तौहस्तिकपाटयोः।पाणिघताडघौशि।ल्पिनि।
आढ्यसुभगस्थूलपलितनग्नांधप्रियेषुच्व्यर्थेष्वच्वौकृञःकरणेख्युन्।कर्तरिभुवःखिष्णुच्खु
कञौ।स्पृशोनुदकेक्विन्।ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचांच।त्यदादिषुदृशोनालोचने
कञ्च॥३॥सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेपिक्विप्।भजोण्विः।छंद
सिसहः।वहश्च।कव्यपुरीषपुरीष्येषुञ्युट्।हव्येनंतःपादं।जनसनखनक्रमगमोविट्।अदोनन्ने।
क्रव्येच।दुहःकप्घश्च।मंत्रेश्वेतवहोक्थशस्पुरोडाशोण्विन्।अवेयजः।विजुपेछंदसि।आ श्रीः
तोमनिन्क्वनिब्वनिपश्च।अन्येभ्योपिदृश्यंते।क्विप्च।स्थःकच।सुप्यजातौणिनिस्ताच्छील्ये। १३

३ अ० ह्र० २
१४

करणे। संबोधने च। लक्षणहेत्वोः क्रियायाः। तौ सत्। पूङ्यजोः शानन्। ताच्छील्यवयोवच
नशक्तिषु चानश्। इङ्धार्य्योः शत्रकृच्छ्रिणि। द्विषोऽमित्रे। सुञो यज्ञसंयोगे। अर्हः प्रशंसायां। आ
क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु। तृन्। अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतु
वृधुसहचर इष्णुच्। णेश्छन्दसि। भुवश्च। ग्लाजिस्थश्च ग्स्नुः। त्रसिगृधिधृषिक्षिपेः क्नुः॥७॥

7

शमित्यष्टाभ्यो घिनुण्। संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरि
वदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च। वौ क
षलसकत्थस्रम्भः। अपे च लषः। प्रे लपसृद्रुमथवदवसः। निंदहिंसक्लिशखादविनाशपरिक्षिप
परिरटपरिवादिव्याभाषासूयो वुञ्। देविक्रुशोश्चोपसर्गे। चलनशब्दार्थादकर्मकाद्युच्।

श्रीः
१४

कर्त्तर्य्युपमाने।व्रते॥४॥बहुलमाभीक्ष्ण्ये।मनः।आत्ममाने खश्च।भूते।करणे यजः।कर्म्मणि
हनः।ब्रह्मभ्रूणवृत्रेषु क्विप्।बहुलं छंदसि।सुकर्म्मपापमंत्रपुण्येषु कृञः।सोमे सुञः।
अग्नौ चेः।कर्म्मण्यग्न्याख्यायां।कर्म्मणी विक्रियः।दृशेः क्वनिप्।राजनि युधि कृञः।स
हे च।सप्तम्यां जनेर्डः।पंचम्यामजातौ।उपसर्गे च संज्ञायां।अनौ कर्म्मणि॥५॥अन्येष्वपि दृ
श्यते।निष्ठा।सुयजोर्ङ्वनिप्।जीर्य्यतेरतृन्।छंदसि लिट्।लिटः कानज्वा।क्वसुश्च।भाषायां सदवस
श्रुवः।उपेयिवाननाश्वाननूचानश्च।लुङ्।अनद्यतने लङ्।अभिज्ञावचने लृट्।न यदि।विभाषा
साकांक्षे।परोक्षे लिट्।हशश्वतोर्लङ् च।प्रश्ने चासन्नकाले।लट् स्मे।अपरोक्षे च।ननौ पृष्टप्रति
वचने॥६॥नन्वोर्विभाषा।पुरि लुङ् चास्मे।वर्त्तमाने लट्।लटः शतृशानचावप्रथमासमानाधि

४अ० सू १
२०

ऊतो मनुष्यजातेः। ऊङुतः। बाह्वन्तात्संज्ञायां। पंगोश्च। ऊरूत्तरपदादौपम्ये। संहितशफल
क्षणवामादेश्च। कद्रुकमंडल्वोश्छन्दसि। संज्ञायां। शार्ङ्गरवाद्यञो ङीन्। यङश्चाप्। आवट्याच्च।
तद्धिताः। यूनस्तिः। अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे। गोत्रावयवात्। क्रौड्यादि
भ्यश्च॥४॥ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकांठेविद्धिभ्योन्यतरस्यां। समर्थानां प्रथमाद्वा। प्राग्दी
व्यतोण्। अश्वपत्यादिभ्यश्च। दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः। उत्सादिभ्योञ्। स्त्रीपुंसाभ्यां
नञ्स्नञौ भवनात्। द्विगोर्लुगनपत्ये। गोत्रेलुगचि। यूनि लुक्। फक्फिञोरन्यतरस्यां। तस्याप
त्यं। एको गोत्रे। गोत्राद्यून्यस्त्रियां। अत इञ्। बाह्वादिभ्यश्च। सुधातुरकङ् च। गोत्रे कुंजादिभ्य
श्च्फञ्। नडादिभ्यः फक्। हरितादिभ्योञः॥५॥ यञिञोश्च। शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु।

श्रीः
२०

४

अन्यतोङीष्॥२॥षिद्गौरादिभ्यश्च।जानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुक
कबराद्वृत्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाछादनायोविकारमैथुनेछाकेशवेशेषु।
शोणात्प्राचां।वोतोगुणवचनात्।बह्वादिभ्यश्च।नित्यंछंदसि।भुवश्च।पुंयोगादाख्यायां।इंद्र
वरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्।क्रीतात्करणपूर्वात्।
क्तादल्पाख्यायां।बहुव्रीहेश्चांतोदात्तात्।अस्वांगपूर्वपदाद्वा।स्वांगाच्चोपसर्जनादसं
योगोपधात्।नासिकोदरौष्ठजंघादंतकर्णशृंगाच्च।नक्रोडादिबह्वचः।सहनञ्विद्यमानपूर्वा
च्च।नखमुखात्संज्ञायां।दीर्घजिह्वीचछंदसि।दिक्पूर्वपदान्ङीप्॥३॥वाहः।सख्यशिश्वी
तिभाषायां।जातेरस्त्रीविषयादयोपधात्।पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च।ई

४अ०सू०१
२१

भ्यांणफिञौ।कुर्वादिभ्योण्यः।सेनांतलक्षणकारिभ्यश्च।उदीचामिञ्।तिकादिभ्यःफिञ्।कौसल्यका
र्मार्यिभ्यांच।अणोद्व्यचः।उदीचांवृद्धादगोत्रात्।वाकिनादीनांकुक्च।पुत्रांतादन्यतरस्यां।प्राचामव
द्धात्फिन्बहुलं॥८॥मनोर्जातावञ्यतौषुक्च।अपत्यंपौत्रप्रभृतिगोत्रं।जीवतितुवंश्येयुवा।
भ्रातरिचज्यायसि।वान्यस्मिन्सपिंडेस्थविरतरेजीवति।वृद्धस्यचपूजायां।यूनश्चकुत्सा
यां।जनपदशब्दात्क्षत्रियादञ्।साल्वेयगांधारिभ्यांच।द्व्यञ्मगधकलिंगसूरमसादण्।
वृद्धेत्कोसलाजादाञ्ञ्यङ्।कुरुनादिभ्योण्यः।साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्।
तेतद्राजाः।कंबोजाल्लुक्।स्त्रियामवंतिकुंतिकुरुभ्यश्च।अतश्च।नप्राच्यभर्गादियौधेयादिभ्यः॥९॥
डुप्पृष्ठिगोःषिद्वाहोदैवश्चाञिञौद्वौचोमहामनोरष्टादश॥ ॥इतिपाणि०सू०४प्रथमः॥४॥१श्रीः
श्रीवेदव्यासायनमः॥तेनरक्तंरागात्।लाक्षारोचनाशकलकर्दमाट्ठक्।नक्षत्रेणयुक्तःकालः।१रिथ
तेन्रथः।

२१

द्रोणपर्वतजीवंतादन्यतरस्यां। अनृष्यानंतर्ये बिदादिभ्योऽञ्। मधुबभ्र्वोर्ब्राह्मणकौशिकयोः। कपि
बोधादांगिरसे। वतंडाच्च। लुक् स्त्रियां। अश्वादिभ्यः फञ्। भर्गात्त्रैगर्ते। शिवादिभ्योऽण्। अवृद्धा
भ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः। ऋष्यंधकवृष्णिकुरुभ्यश्च। मातुरुत्संख्यासंभद्रपूर्वायाः। कन्या
याः कनीन च। विकर्णशुंगछगलाद्वत्सभरद्वाजात्रिषु। पीलाया वा। ढक् च मंडूकात्। स्त्रीभ्यो ढक्॥६॥
द्व्यचः। इतश्चानिञः। शुभ्रादिभ्यश्च। विकर्णकुषीतकात्काश्यपे। भ्रुवो वुक् च। कल्याण्यादीनामिनङ्। कुल
टाया वा। चटकाया ऐरक्। गोधाया ढ्रक्। आरगुदीचां। क्षुद्राभ्यो वा। पितृष्वसुश्छण्। ढकि लोपः। मा
तृष्वसुश्च। चतुष्पाद्भ्यो ढञ्। गृष्ट्यादिभ्यश्च। राजश्वशुराद्यत्। क्षत्राद्घः। कुलात्खः। अपूर्वपदा
दन्यतरस्यां यड्ढकञौ॥७॥ महाकुलादञ्खञौ। दुष्कुलाड्ढक्। स्वसुश्छः। भ्रातुर्व्यच्च। व्यन्सपत्ने
रेवत्यादिभ्यष्ठक्। गोत्रस्त्रियाः कुत्सने ण च। वृद्धाट्ठक् सौवीरेषु बहुलं। फेश्छ च। फाण्टाहृतिमिमता

गर्गादिभ्ये

ण्या ५

धेनोष्ठञ्।केशाश्वाभ्यांयञ्छावन्यतरस्यां।पाशादिभ्योयः।खलगोरथात्।इनित्रकट्यचश्च।विषयो
देशे।राजन्यादिभ्योवुञ्।भौरिक्याद्यैषुकार्यादिभ्योविधल्भक्तलौ।सोस्यादिरितिछंदसःप्रगाथेषु।
संग्रामेप्रयोजनयोद्धृभ्यः।तदस्यांप्रहरणमितिक्रीडायांणः।घञःसास्यांक्रियेतिञः।तदधीतेत
द्वेद।क्रतूक्थादिसूत्रांताट्ठक्।।३।।क्रमादिभ्योवुन्।अनुब्राह्मणादिनिः।वसंतादिभ्यष्ठक्।प्रो
क्ताल्लुक्।सूत्राच्चकोपधात्।छंदोब्राह्मणानिचतद्विषयाणि।तदस्मिन्नस्तीतिदेशेतन्नाम्नि।ते
ननिर्वृत्तं।तस्यनिवासः।अदूरभवश्च।ओरञ्।मतोश्चबह्वजंगात्।बह्वचःकूपेषु।उदक्चविपाशः।
संकलादिभ्यश्च।स्त्रीषुसौवीरसाल्वप्राक्षु।सुवास्त्वादिभ्योण्।रोणी।कोपधाच्च।वुञ्छण्कठजि
लसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मस
खिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः।।४।।जनपदेलुप्।वरणादिभ्यश्च।

लुबविशेषे। संज्ञायां श्रवणाश्वत्थाभ्यां। द्वंद्वाच्छः। दृष्टं साम। कलेर्ढक्। वामदेवाड्ड्यड्ड्यौ। परिवृतो रथः।
पांडुकंबलादिनिः। द्वैपवैयाघ्रादञ्। कौमारापूर्ववचने। तत्रोद्धृतममत्रेभ्यः। स्थंडिलाच्छयितरि व्रते।
संस्कृतं भक्षाः। शूलोखाद्यत्। दध्नष्ठक्। उदश्वितोऽन्यतरस्यां। क्षीराड्ढञ्॥१॥ सास्मिन्पौर्णमासीति
संज्ञायां। आग्रहायण्यश्वत्थाट्ठक्। विभाषाफाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः। सास्य देवता। कस्येत्।
शुक्राद्घन्। अपोनप्त्रपांनप्तृभ्यां घः। छ च। महेंद्राद्घाणौ च। सोमाट्ट्यण्। वाय्वृतुपित्रुषसो यत्। द्यावा
पृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च। अग्नेर्ढक्। कालेभ्यो भववत्। महाराज
प्रोष्ठपदाट्ठञ्। पितृव्यमातुलमातामहपितामहाः। तस्य समूहः। भिक्षादिभ्योऽण्। गोत्रोक्षोष्ट्रोरभ्रराजरा
जन्यराजपुत्रवत्समनुष्याजाद्वुञ्। केदाराद्यञ्च॥२॥ ठञ्कवचिनश्च। ब्राह्मणमाणववाडवाद्यत्।
ग्रामजनबंधुसहायेभ्यस्तल्। अनुदात्तादेरञ्। खंडिकादिभ्यश्च। चरणेभ्यो धर्मवत्। अचित्तहस्ति

४अ०सू२
२३

कच्छाग्निवक्त्रगर्त्तोत्तरपदात्।धूमादिभ्यश्च।नगरात्कुत्सनप्रावीण्ययोः।अरण्यान्मनुष्ये।
विभाषा कुरुयुगंधराभ्यां।मद्रवृज्योः कन्।कोपधादण्।कच्छादिभ्यश्च।मनुष्यतत्स्थयोर्वुञ्।
अपदातौ साल्वात्।गोयवाग्वोश्च।गर्त्तोत्तरपदाच्छः।गहादिभ्यश्च।प्राचां कटादेः।राज्ञः क च।
वृद्धादकेकान्तखोपधात्।कन्थापलदनगरग्रामह्रदोत्तरपदात्।पर्वताच्च।विभाषामनुष्ये।
कृकणपर्णाद्भारद्वाजे॥८॥तेनसास्मिन्नूठञ्ञूक्रमजनद्युप्राग्धन्वद्वहासंच॥ ॥इति४यस्य२पादः॥
श्रीवेदव्यासायनमः॥युष्मदस्मदोरन्यतरस्यां खञ्च।तस्मिन्नणि च युष्माकास्माकौ।तवकम
मकावेकवचने।अर्द्धाद्यत्।परावराधमोत्तमपूर्वाच्च।दिक्पूर्वपदाट्ठञ्च।ग्रामजनपदैकदेशादञ्ठ
ञौ।मध्यान्मः।अ सांप्रतिके।द्वीपादनुसमुद्रं यञ्।कालाट्ठञ्।श्राद्धे शरदः।विभाषा रोगातपयोः।श्रीः
निशाप्रदोषाभ्यां च।श्वसस्तुट् च।संधिवेलाद्यृतुनक्षत्रेभ्योऽण्।प्रावृष एण्यः।वर्षाभ्यष्ठक्।छन्दसि ठञ्।२३

प३

शर्कराया वा । ठक्छौ च । नद्यां मतुप् । मध्वादिभ्यश्च । कुमुदनडवेतसेभ्यो ड्मतुप् । नडशादाड्ड्वलच् ।
शिखाया वलच् । उत्करादिभ्यश्छः । नडादीनां कुक् च । शेषे । राष्ट्रावारपाराद्घखौ । ग्रामाद्यखञौ ।
कत्त्र्यादिभ्यो ढकञ् । कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु । नद्यादिभ्यो ढक् । दक्षिणापश्चात्पुरस
स्त्यक् । कापिश्याः ष्फक् । रंकोरमनुष्येण् च ॥५॥ द्युप्रागपागुदक्प्रतीचो यत् । कंथायाष्ठक् । व
र्णौ वुक् । अव्ययात्त्यप् । ऐषमोह्यःश्वसोन्यतरस्यां । तीररूप्योत्तरपदादञ्ञौ । दिक्पूर्व
पदादसंज्ञायां ञः । मद्रेभ्योञ् । उदीच्यग्रामाच्च बह्वचोन्तोदात्तात् । प्रस्थोत्तरपदपलद्यादिक
पधादण् । कण्वादिभ्यो गोत्रे । इञश्च । न द्व्यचः प्राच्यभरतेषु । वृद्धाच्छः । भवतष्ठक्छसौ । काश्यादि
भ्यष्ठञ्ञिठौ । वाहीकग्रामेभ्यश्च । विभाषोशीनरेषु । ओर्देशे ठञ् । वृद्धात्प्राचां ॥६॥ धन्वयोपधा
द्वुञ् । प्रस्थपुरवहांताच्च । रोपधेतोः प्राचां । जनपदतदवध्योश्च । अवृद्धादपि बहुवचनविषयात् ।

४अ०स्त्र ३
२४

12

परावुञ्॥३॥ग्रामात्पर्यनुपूर्वात्॥जिह्वामूलांगुलेश्छः।वर्गान्ताच्च।अशब्दे यत्खावन्यतरस्यां।
कणेललाटात्कन्।अलंकारे।तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः।बह्वचोंतोदात्ताट्ठञ्।
क्रतुयज्ञेभ्यश्च।अध्यायेष्वेवर्षेः।पौरोडाशपुरोडाशात्ष्ठन्।छंदसो यदणौ।द्व्यजृद्ब्राह्मणर्क्प्रथ
माध्वरपुरश्चरणनामाख्यातात्ठक्।अणृगयनादिभ्यः।तत आगतः।ठगायस्थानेभ्यः।शुंडि
कादिभ्योण्।विद्यायोनिसंबंधेभ्यो वुञ्।ऋतष्ठञ्।पितुर्यच्च।गोत्रादंकवत्॥४॥हेतुमनुष्येभ्यो
न्यतरस्यां रूप्यः।मयट् च।प्रभवति।विदूराञ्ञ्यः।तद्गच्छति पथिदूतयोः।अभिनिष्क्रामति द्वारं।अ
धिकृत्य कृते ग्रंथे।शिशुक्रंदयमसभद्वंद्वेंद्रजननादिभ्यश्छः।सोस्य निवासः।अभिजनश्च।आ
युधजीविभ्यश्छः पर्वते।शंडिकादिभ्यो ञ्यः।सिंधुतक्षशिलादिभ्योणञौ।तूदीशलातुरवर्म
तीकूचवाराड्ढक्छण्ढञ्यकः।भक्तिः।अचित्ताददेशकालाट्ठक्।महाराजाट्ठञ्।वासुदेवार्जु

नि ४

श्रीः
२४

वसंताच्च ॥१॥ हेमंताच्च । सर्वत्राण् च तलोपश्च । सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च । विभाषा
पूर्वाह्णापराह्णाभ्यां । तत्र जातः । प्रावृषष्ठप् । संज्ञायां शरदो वुञ् । पूर्वाह्णापराह्णार्द्रामूलप्रदो
षावस्कराद्वुन् । पथः पंथ च । अमावास्याया वा । अ च । सिंधुअपकराभ्यां कन् । अणञौ च । श्रविष्ठाफ
ल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् । स्थानांतगोशालखरशाला

१२५ च्च । वत्सशालाभिजिदश्वयुक्छतभिषजो वा । नक्षत्रेभ्यो बहुलं । कृतलब्धक्रीतकुशलाः । प्रायभवः ।
उपजानूपकर्णोपनीवेष्ठक् ॥२॥ संभूते । कोशाड्ढञ् । कालात्साधुपुष्प्यत्पच्यमानेषु । उप्ते च । आश्व
युज्या वुञ् । ग्रीष्मवसंतादन्यतरस्यां । देयमृणे । कलाप्यश्वत्थयवबुसाद्वुन् । ग्रीष्मावरसमाद्वुञ् ।
संवत्सराग्रहायणीभ्यां ठञ् च । व्याहरति मृगः । तदस्य सोढं । तत्र भवः । दिगादिभ्यो यत् । शरीरावयवा
च्च । दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् । ग्रीवाभ्योऽण् च । गंभीराञ्ञ्यः । अव्ययीभावाच्च । अंतःपूर्व

वृक्षेभ्यः। बिल्वादिभ्योऽण्। कोपधाच्च। त्रपुजतुनोः षुक्। ओरञ्। अनुदात्तादेश्च॥७॥ पलाशादि
भ्यो वा। शम्याष्ट्लञ्। मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः। नित्यं वृद्धशरादिभ्यः। गोश्च पुरीषे। पि
ष्टाच्च। संज्ञायां कन्। व्रीहेः पुरोडाशे। असंज्ञायां तिलयवाभ्यां। द्व्यचश्छन्दसि। नोत्वद्वर्ध्रबिल्वात्। तालादिभ्यो
ऽण्। जातरूपेभ्यः परिमाणे। प्राणिरजतादिभ्योऽञ्। ञितश्च तत्प्रत्ययात्। क्रीतवत्परिमाणात्। उष्ट्राद्वुञ्। उ
मोर्णयोर्वा। एण्या ढञ्। गोपयसोर्यत्॥८॥ द्रोश्च। माने वयः। फले लुक्। प्लक्षादिभ्योऽण्। जम्ब्वा वा। लु
प् च। हरीतक्यादिभ्यश्च। कंसीयपरशव्ययोर्यञञौ लुक् च॥९॥ युष्मद्दमेतात्संभूते ग्रामाद्वेहुने
नरथा पलाशादिभ्यो द्रोश्चाष्टौ॥ ॥इति पाणिनिसूत्रे चतुर्थाध्यायस्य तृतीयः पादः॥ ॥४॥३॥
श्रीवेदव्यासाय नमः॥ प्राग्वहतेष्ठक्। तेन दीव्यति खनति जयति जितं। संस्कृतं। कुलत्थकोपधादण्।
तरति। गोपुच्छाट्ठञ्। नौद्व्यचष्ठन्। चरति। आकर्षात्ष्ठल्। पर्पादिभ्यः ष्ठन्। [illegible]
श्वगणाट्ठञ्च। वेत

नाभ्यां वुञ् । गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् । जनपदिनां जनपदवत्सर्वं जनपदेन समान
शब्दानां बहुवचने ॥५॥ तेन प्रोक्तं । तित्तिरिवरतन्तुखण्डिकोखाच्छण् । काश्यपकौशिकाभ्यामृषि
भ्यां णिनिः । कलापिवैशंपायनान्तेवासिभ्यश्च । पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । शौनकादिभ्य
श्छन्दसि । कठचरकाल्लुक् । कलापिनोऽण् । छगलिनो ढिनुक् । पाराशर्यशिलालिभ्यां भिक्षुनटसूत्र
योः । कर्मन्दकृशाश्वादिनिः । तेनैकदिक् । तसिश्च । उरसो यच्च । उपज्ञाते । कृते ग्रन्थे । संज्ञायां कुला
दिभ्यो वुञ् । क्षुद्राभ्रमरवटरवातपादञ् । तस्येदं ॥६॥ रथाद्यत् । पत्त्रपूर्वादञ् । पत्त्राध्वर्युपरिषदश्च
हलसीराट्ठक् । द्वन्द्वाद्वुन्वैरमैथुनिकयोः । गोत्रचरणाद्वुञ् । संघाङ्कलक्षणेष्वञ्यञिञामण् । शाक
लाद्वा । छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः । न दण्डमाणवान्तेवासिषु । रैवतिकादिभ्यश्छः ।
कौपिंजलहास्तिपदादण् । आथर्वणिकस्येकलोपश्च । तस्य विकारः । अवयवे च प्राण्योषधि

४अ०सू०४ २६

भक्ष्याः । तदस्मै दीयते नियुक्तं । श्राणामांसौदनाट्टिठन् । भक्तादणन्यतरस्यां । तत्र नियुक्तः । अगा-
रान्ताट्ठन् । अध्यायिन्यदेशकालात् । कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति । निकटे वसति । आव-
सथात् ष्ठल् । प्राग्घिताद्यत् । तद्वहति रथयुगप्रासंगं । धुरो यड्ढकौ । खः सर्वधुरात् । एकधुराल्लुक् च ।
शकटादण् ॥४॥ हलसीराट्ठक् । संज्ञायां जन्याः । विध्यत्यधनुषा । धनगणं लब्धा । अन्नाण्णः । वशं गतः ।
पदमस्मिन्दृश्यं । मूलमस्याबर्हि । संज्ञायां धेनुष्या । गृहपतिना संयुक्ते ञ्यः । नौवयोधर्मविषमूल-
मूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु । धर्म्मपथ्यर्थन्यायादन-
पेते । छन्दसो निर्मिते । उरसोऽण् च । हृदयस्य प्रियः । बंधने चर्षौ । मतजनहलात्करणजल्पकर्षेषु ।
तत्र साधुः । प्रतिजनादिभ्यः खञ् । भक्ताण्णः । परिषदो ण्यः । कथादिभ्यः ष्ठक् । गुडादिभ्यः ष्ठञ् ।
पथ्यतिथिवसतिस्वपतेर्ढञ् । सभाया यः । ढश्छन्दसि । समानतीर्थे वासी । समानोदरे शयित ओ
चोदात्तः । सोदराद्यः । भवे छन्दसि । पाथोनदीभ्यां ड्यण् । वेशन्तहिमवद्भ्यामण् । स्रोतसो विभाषा ड्यड्ड्यौ ।

२४ श्रीः २६

ना दिभ्यो जीवति। वस्नक्रयविक्रयाट्ठन्। आयुधाच्छ च। हरत्युत्संगादिभ्यः। भस्त्रादिभ्यः ष्ठन्। विभा
षा विवधवीवधात्। अण् कुटिलिकायाः। निर्वृत्तेऽक्षद्यूतादिभ्यः। क्त्रेर्मम्नित्यं॥१॥ अपमित्ययाचि
ताभ्यां कक्कनौ। संसृष्टे। चूर्णादिनिः। लवणाल्लुक्। मुद्गादण्। व्यंजनैरुपसिक्ते। ओजःसहोम्भसा
वर्त्तते। तत्प्रत्यनुपूर्वमीपलोमकूलं। परिमुखं च। प्रयच्छति गर्ह्यं। कुसीददशैकादशात्ष्ठन्ष्ठचौ। उंछति।
रक्षति। शब्ददर्दुरं करोति। पक्षिमत्स्यमृगान्हंति। परिपंथं च तिष्ठति। माथोत्तरपदपदव्यनुपदं धावति।
आक्रंदाट्ठञ्च। पदोत्तरपदं गृह्णाति। प्रतिकंठार्थललामं च॥२॥ धर्मं चरति। प्रतिपथमेति ठंश्च। समवा
यान्समवैति। परिषदो ण्यः। सेनाया वा। संज्ञायां ललाटकुक्कुट्यौ पश्यति। तस्य धर्म्यं। अण्महिष्या
दिभ्यः। ऋतोऽञ्। अवक्रयः। तदस्य पण्यं। लवणाट्ठञ्। किशरादिभ्यः ष्ठन्। शलालुनोऽन्यतर
स्यां। शिल्पं। मड्डुकझर्झरादणन्यतरस्यां। प्रहरणं। परश्वधाट्ठञ्च। शक्तियष्ट्योरीकक्। अस्ति
नास्ति दिष्टं मतिः॥३॥ शीलं। छत्रादिभ्यो णः। कर्माध्ययने वृत्तं। बह्वच्पूर्वपदाट्ठच्। हितं

५अ०सू०१
२७
रि

छदिरुपधिबलेर्ढञ् । ऋषभोपानहोर्ञ्यः । चर्मणोऽञ् । तदस्य तदस्मिन्स्यादिति । परिखाया ढञ् ।
प्राग्वतेष्ठञ् । आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् । असमासे निष्कादिभ्यः ॥१॥ शताच्च ठन्यतावश
ते । संख्याया अतिशदन्तायाः कन् । वतोरिड्वा । विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायां । कंसाट्टिठन् । शूर्पादञन्य
तरस्यां । शतमानविंशतिकसहस्रवसनादण् । अध्यर्धपूर्व द्विगोर्लुगसंज्ञायां । विभाषा कार्षापण
सहस्राभ्यां । द्वित्रिपूर्वान्निष्कात् । बिस्ताच्च । विंशतिकात्खः । खार्या ईकन् । पणपादमाषशताद्यत् । शा
णाड्वा । द्वित्रिपूर्वादण्च । तेन क्रीतं । तस्य निमित्तं संयोगोत्पातौ । गोद्व्यचोसंख्यापरिमाणाश्वादेर्य
त् । पुत्राच्छ च ॥२॥ सर्वभूमिपृथिवीभ्यामणञौ । तस्येश्वरः । तत्र विदित इति च । लोकसर्वलोकाभ्यां
ठञ् । तस्य वापः । पात्रात्ष्ठन् । तदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयते । पूरणार्धाट्ठन् । भागाद्यच्च । त
द्धरतिवहत्यावहति भाराद्वंशादिभ्यः । वस्नद्रव्याभ्यां ठन्कनौ । संभवत्यवहरति पचति । आढकाचितपा
त्रात्खोऽन्यतरस्यां । द्विगोष्ठंश्च । कुलिजाल्लुक्खौ च । सोऽस्यांशवस्नभृतयः । तदस्य परिमाणं । संख्यायाः

श्रीः
२७

सगर्भसयूथसनुताद्यत्।तुग्राद्घन्।अग्राद्यत्।घछौ च।समुद्राभ्राद्घः॥बर्हिषिदत्तं।दूतस्य
भागकर्मणी॥६॥रक्षोयातूनां हननी।रेवतीजगतीहविष्याभ्यः प्रशस्ये।असुरस्य स्वं।मायाया
मण्।तद्वानासामुपधानो मंत्र इतीष्टकासु लुक्च मतोः।अश्विमानण्।वयस्यासु मूर्ध्नो मतुप्।म
त्वर्थे मासतन्वोः।मधोर्ञ च।ओजसोहनि यत्खौ।वेशोयशआदेर्भगाद्यल्खौ।पूर्वैः कृतमिनयौ च।ख च।
अद्भिः संस्कृतं।सहस्रेण संमितौ घः।मतौ च।सोममर्हति यः।मये च।मधोः।वसोः समूहे च॥७॥न
क्षत्राद्घः।सर्वदेवात्तातिल्।शिवशमरिष्टस्य करे।भावे च॥८॥प्रागप्मित्यर्धमं शीलं हलपरिषदो
रक्षोनत्रीच्चत्वारि॥ ॥इति पाणिनिसूत्रे चतुर्थाध्यायस्य चतुर्थः पादः॥ ॥४॥४॥अध्यायः समाप्तः॥
श्रीवेदव्यासाय नमः॥प्राक्क्रीताच्छः।उगवादिभ्यो यत्।कंबलाच्च संज्ञायां।विभाषा हविरपूपादि
भ्यः।तस्मै हितं।शरीरावयवाद्यत्।खलयवमाषतिलवृषब्रह्मणश्च।अजाविभ्यां थ्यन्।आत्मन्विश्व
जनभोगोत्तरपदात्खः।सर्वपुरुषाभ्यां णढञौ।माणवचरकाभ्यां खञ्।तदर्थं विकृतेः प्रकृतौ।

घ४

२.५२

संपादिनि। कर्मवेषाद्यत्॥५॥ तस्मै प्रभवति संतापादिभ्यः। योगाद्यच्च। कर्मण उकञ्। समयस्त
दस्य प्राप्तं। ऋतोरण्। छंदसि घस्। कालाद्यत्। प्रकृष्टे ठञ्। प्रयोजनं। विशाखाषाढादण्मंथदं
डयोः। अनुप्रवचनादिभ्यश्छः। समापनात्सपूर्वपदात्। ऐकागारिकट् चौरे। आकालिकडाद्यंत
वचने। तेन तुल्यं क्रिया चेद्वतिः। तत्र तस्येव। तदर्हं। छंदसि धात्वर्थे। तस्य भावस्त्वतलौ। आच
त्वात्॥६॥ नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटबुधकतरसलसेभ्यः। पृथ्वादिभ्य इमनिज्वा॥
वर्णदृढादिभ्यः ष्यञ्च। गुणवचनब्राह्मणादिभ्यः कर्मणि च। स्तेनाद्यन्नलोपश्च। सख्युर्यः। कपि
ज्ञात्योर्ढक्। पत्यंतपुरोहितादिभ्यो यक्। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्। हायनांतयु
वादिभ्योऽण्। इगंताच्च लघुपूर्वात्। योपधाद्गुरूपोत्तमाद्वुञ्। द्वंद्वमनोज्ञादिभ्यश्च। गोत्रचरणा
च्छ्लाघात्याकारतदवेतेषु। होत्राभ्यश्छः। ब्रह्मणस्त्वः॥७॥ प्राक्क्रीताच्छुतार्च्चं सर्वसम्पन्नोञ् मासा

16

संज्ञासंघसूत्राध्ययनेषु। पंक्ति विंशति त्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं। पंच
दशतौ वर्गे वा॥२॥ सप्तनोञ्छंदसि। त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्। तदर्हति। छेदादि
भ्यो नित्यं। शीर्षच्छेदाद्यच्च। दंडादिभ्यो यः। छंदसि च। पात्राद्धंश्च। कडंगरदक्षिणाच्छ च। स्थालीबिलात्। यज्ञर्त्विग्भ्यां घखञौ। पारायणतुरायणचांद्रायणं वर्त्तयति। संशयमापन्नः। योजनं गच्छति। पथष्कन्। पंथोण नित्यं। उत्तरपथेनाहृतं च। कालात्। तेन निर्वृत्तं। तमधीष्टो भृतो भूतो भावी॥४॥
मासाद्वयसि यत्खञौ। द्विगोर्यप्। षण्मासाण्ण्यच्च। अवयसि ठंश्च। समायाः खः। द्विगोर्वा। रात्र्यहःसंवत्सराच्च। वर्षाल्लुक्। चित्तवति नित्यं। षष्टिकाः षष्टिरात्रेण पच्यंते। वत्सरांताच्छश्छंदसि॥५॥
संपरिपूर्वात्ख च। तेन परिजय्यलभ्यकार्यसुकरं। तदस्य ब्रह्मचर्यं। तस्य च दक्षिणा यज्ञाख्येभ्यः। तत्र च दीयते कार्यं भववत्। व्युष्टादिभ्योण्। तेन यथाकथाच हस्ताभ्यां णयतौ।

५अ०सू०४ वाल्कूटारच्च । नेते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः । नेर्बिडज्बिरीसचौ । इनच्पिटच्चि

२९ कचि च । उपाधिभ्यां त्यकन्नासन्नारूढयोः । कर्मणि घटोऽठच् । तदस्य संजातं तारकादिभ्य इ

तच् । प्रमाणे द्वयसज्दघ्नञ्मात्रचः । पुरुषहस्तिभ्यामण् च । यत्तदेतेभ्यः परिमाणे वतुप् । किमि

दंभ्यां वो घः ॥२॥ किमः संख्यापरिमाणे डति च । संख्याया अवयवे तयप् । द्वित्रिभ्यां तयस्या

यज्वा । उभादुदात्तो नित्यं । तदस्मिन्नधिकमिति दशान्ताड्डः । शदन्तविंशतेश्च । संख्याया गुणस्य

२ध निमाने मयट् । तस्य पूरणे डट् । नान्तादसंख्यादेर्मट् । थट् च छन्दसि । षट्कतिकतिपयचतुरां थुक् । ब

हुपूगगणसंघस्य तिथुक् । वतोरिथुक् । द्वेस्तीयः । त्रेः संप्रसारणं च । विंशत्यादिभ्यस्तमडन्य

तरस्यां । नित्यं शतादिमासार्द्धमाससंवत्सराच्च । षष्ठ्यादेश्चासंख्यादेः । मतौ छः सूक्तसाम्नोः । अ त्रीः

ध्यायानुवाकयोर्लुक् ॥३॥ विमुक्तादिभ्योऽण् । गोषदादिभ्यो वुन् । तत्र कुशलः पथः । आकर्षादि २८

17

तस्मैनन्स्नूर्वात्विंशोडश॥ ॥इतिपाणिनिसूत्रेपंचमाध्यायस्यप्रथमः पादः॥ ॥श्रीकृष्ण॥ १
श्रीवेदव्यासायनमः॥ धान्यानांभवनेक्षेत्रेखञ्॥ व्रीहिशाल्योर्ढक्॥ यवयवकषष्टिकाद्यत्॥ विभा
षातिलमाषोमाभंगाणुभ्यः॥ सर्वचर्मणःकृतःखखञौ॥ प्रथामुखसंमुखस्यदर्शनःखः॥ तत्स
र्वादेःपथ्यंगकर्मपत्रपात्रंव्याप्नोति॥ आप्रपदंप्राप्नोति॥ अनुपदसर्वान्नायानयंबद्धाभक्षयतिने
येषु॥ परोवरपरंपरपुत्रपौत्रमनुभवति॥ अवारपारात्यंतानुकामंगामी॥ समांसमांविजायते॥
अद्यश्वीनावष्टब्धे॥ आगवीनः॥ अनुग्वलंगामी॥ अध्वनोयत्खौ॥ अभ्यमित्राच्छच॥ गोष्ठात्खञ्
भूतपूर्वे॥ अश्वस्यैकाहगमः॥ शालीनकौपीनेअधृष्टाकार्ययोः॥ २॥ व्रातेनजीवति॥ साप्तपदी
नंसख्यं॥ हैयंगवीनंसंज्ञायां॥ तस्यपाकमूलेपील्वादिकर्णादिभ्यःकुणब्जाहचौ॥ पक्षात्तिः॥
तेनवित्तश्चुंचुप्चणपौ॥ विनञ्भ्यांनानाञौनसह॥ वेःशालच्छंकटचौ॥ संप्रोदश्चकटच्॥ अ

५अ॰सू॰२
३०

सहस्राभ्यांविनीनी।अण्च।सिकताशर्कराभ्यांच।देशेलुबिलचौच।दंतउन्नतउरच्।ऊषसुषि
मुष्कमधोरः।द्युद्रुभ्यांमः।केशाद्वोन्यतरस्यां।गांड्यजगात्संज्ञायां।कांडांडादीरन्नीरचौ।रजःकृ
ष्यासुतिपरिषदोवलच्।दंतशिखात्संज्ञायां।ज्योत्स्नातमिस्राशृंगिणोर्जस्विन्नूर्जस्वलगो
मिन्मलिनमलीमसाः।अतइनिठनौ।व्रीह्यादिभ्यश्च।तुंदादिभ्यइलच्च।एकगोपूर्वाट्ठञ्नि
त्यं।शतसहस्रांताच्चनिष्कात्।रूपादाहतप्रशंसयोर्यप्॥६॥अस्मायामेधास्रजोविनिः।बहुलं
छंदसि।ऊर्णायायुस्।वाचोग्मिनिः।आलजाटचौबहुभाषिणि।स्वामिन्नैश्वर्ये।अर्शआदिभ्योच्।
द्वंद्वोपतापगर्ह्यात्प्राणिस्थादिनिः।वातातीसाराभ्यांकुक्च।वयसिपूरणात्।सुखादिभ्यश्च।धर्म
शीलवर्णांताच्च।हस्ताज्जातौ।वर्णाद्ब्रह्मचारिणि।पुष्करादिभ्योदेशे।बलादिभ्योमतुबन्यतर
स्यां।संज्ञायांमन्माभ्यां।कंशंभ्यांबभयुस्तितुतयसः।तुंदिबलिवटेर्भः।अहंशुभमोर्युस्॥७॥

श्रीः
३०

भ्यः कन्। धनहिरण्यात्कामे। स्वांगेभ्यः प्रसिते। उदराट्ठगाद्यूने। सस्येन परिजातः। अंशं हारी। तंत्रा
दचिरापहृते। ब्राह्मणकोष्णिके संज्ञायां। शीतोष्णाभ्यां कारिणि। अधिकं। अनुकाभिकाभीकः
कमिता। पार्श्वेनान्विच्छति। अयःशूलदंडाजिनाभ्यां ठक्ठञौ॥ तावतिथं ग्रहणमिति लुग्वा। स
एषां ग्रामणीः। शृंखलमस्य बंधनं करभे। उत्क उन्मनाः॥४॥ कालप्रयोजनाद्रोगे। तदस्मिन्नन्नं
प्राये संज्ञायां। कुल्माषादञ्। श्रोत्रियंश्छंदोधीते। श्राद्धमनेन भुक्तमिनिठनौ। पूर्वादिनिः। सपूर्वाच्च।
इष्टादिभ्यश्च। छंदसि परिपंथिपरिपरिणौ पर्यवस्थातरि। अनुपद्यन्वेष्टा। साक्षाद्द्रष्टरि संज्ञायां। क्षे
त्रियच्परक्षेत्रे चिकित्स्यः। इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्रजुष्टमिंद्रदत्तमिति वा। तदस्या
स्त्यस्मिन्निति मतुप्। रसादिभ्यश्च। प्राणिस्थादातो लजन्यतरस्यां। सिध्मादिभ्यश्च। वत्सांसाभ्यां
कामबले। फेनादिलच्च। लोमादिपामादिपिच्छादिभ्यः शनेलचः॥५॥ प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः। तपः

५ अ० स्० ३
३१

पश्चपश्चाचछंदसि।उत्तराधरदक्षिणादातिः।एनबन्यतरस्यामदूरेपंचम्याः।दक्षिणादाच्।आहिच
दूरे।उत्तराच्च।पूर्वाधरावराणामसिपुरधवश्चैषां।अस्तातिच॥२॥विभाषावरस्य।संख्यायाविं
धार्थेधा।अधिकरणविचालेच।एकाद्धोध्यमुञन्यतरस्यां।द्वित्र्योश्चधमुञ्।एधाच्च।याप्येपाशप्।
पूरणाद्भागेतीयादन्।प्रागेकादशभ्योऽछंदसि।षष्ठाष्टमाभ्यांञच।मानपश्वंगयोःकन्लुकौच।
एकादाकिनिच्चासहाये।भूतपूर्वेचरट्।षष्ठ्यारूप्यच।अतिशायनेतमबिष्ठनौ।तिङश्च।द्विवचनविभ
ज्योपपदेतरबीयसुनौ।अजादीगुणवचनादेव।तुश्छंदसि।प्रशस्यस्यश्रः॥३॥ज्यच।वृद्धस्यच।
अंतिकबाढयोर्नेदसाधौ।युवाल्पयोःकनन्यतरस्यां।विन्मतोर्लुक्।प्रशंसायांरूपप्।ईषद
समाप्तौकल्पब्देश्यदेशीयरः।विभाषासुपोबहुच्पुरस्तात्तु।प्रकारवचनेजातीयर्।प्रागिवात्कः।अ
व्ययसर्वनाम्नामकच्प्राक्टेः।कस्यचदः।अज्ञाते।कुत्सिते।संज्ञायांकन्।अनुकंपायां।नीतौचतद्युक्तात्।

श्रीः
२१

17

धान्यानांभ्रातेनकिमोविमुक्तःकालप्रज्ञाऽस्मायाविंशतिः॥ ॥इतिपाणिनिसूत्रेपंचमा
ध्यायस्यद्वितीयःपादः॥ ॥श्रीवेदव्यासायनमः॥ ॥श्रीगोवर्धनाचलोद्धर्त्रयेनमः॥
श्रीवेदव्यासायनमः॥प्राग्दिशोविभक्तिः।किंसर्वनामबहुभ्योऽद्व्यादिभ्यः।इदमइश्।एतेतौरथोः।
एतदोऽश्।सर्वस्यसोऽन्यतरस्यांदि।पंचम्यास्तसिल्।तसेश्च।पर्यभिभ्यांच।सप्तम्यास्त्रल्।इद
मोहः।किमोऽत्।वाहचच्छंदसि।इतराभ्योपिदृश्यंते।सर्वैकान्यकिंयत्तदःकालेदा।इदमोर्हिल्।अधु
ना।दानींच।तदोदाच।तयोर्दार्हिलौचछंदसि॥१॥अनद्यतनेर्हिलन्यतरस्यां।सद्यःपरुत्परा
र्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः।प्रकारवचने
थाल्।इदमस्थमुः।किमश्च।थाहेतौचच्छंदसि।दिक्शब्देभ्यःसप्तमीपंचमीप्रथमाभ्योदिग्देशकाले
ष्वस्तातिः।दक्षिणोत्तराभ्यामतसुच्।विभाषापरावराभ्यां।अंचेर्लुक्।उपर्युपरिष्टात्।पश्चात्।

५अ०सू०४ मृच्छालावा। छिरवावच्छमी। वद्दूर्णा विद्धुमद्दणोयञ्। न्यादयश्च स्तद्राजाः॥ ६॥ आदिशोनद्यतने विभा

३२ —१— षाज्यचजातिनाम्नोवस्तेरेकोनविंशतिः॥ ॥इतिपाणिनिसूत्रेपध्यायस्यातृतीयःपादः॥ ॥श्रीः —१—

श्रीवेदव्यासायनमः॥ पादशतस्यसंख्यादेर्वीप्सायांवुन्लोपश्च। दंडव्यवसर्गयोश्च। स्थूलादि

भ्यःप्रकारवचनेकन्। अनत्यंतगतौक्तात्। नसामिवचने। बृहत्याआच्छादने। अषडक्षाशितंगु

लंकर्मालंपुरुषाध्युत्तरपदात्खः। विभाषांचैरदिक्स्त्रियां। जात्यंतांच्छबंधुनि। स्थानांताद्विभाषास

स्थानेनेतिचेत्। किमेत्तिङव्ययघादाम्बद्रव्यप्रकर्षे। अमुचच्छंदसि। अनुगादिनष्ठक्। एणचस्त्रि

यामञ्। अणिनुणः। विसारिणोमत्स्ये। संख्यायाःक्रियाभ्यावृत्तिगणनेकृत्वसुच्। द्वित्रिचतुर्भ्यःसु

च्। एकस्यसकृच्च। विभाषाबहोर्धाविप्रकृष्टकाले॥ १॥ तत्प्रकृतवचनेमयट्। समूहवच्चबहुषु। अ श्रीः

नंतावसथेतिहभेषजाञ्ञ्यः। देवतांतात्तादर्थ्येयत्। पादार्घाभ्यांच। अतिथेर्ण्यः। देवात्तल्। ३२

बह्वचोमनुष्यनाम्नष्ठज्वा।घनिलचौच।प्राचामुपादेरडज्वुचौच॥४॥जातिनाम्नःकन्।अजिनांतस्यो
त्तरपदलोपश्च।ठाजादावूर्ध्वं द्वितीयादचः।शेवलसुपरिविशालवरुणार्यमादीनांतृतीयात्।अल्पे
ह्रस्वे।संज्ञायांकन्।कुटीशमीशुंडाभ्योरः।कुत्वाडुपच्।कासूगोणीभ्यांष्टरच्।वत्सोक्षाश्वर्षभेभ्य
श्चतनुत्वे।किंयत्तदोनिर्द्धारणेद्वयोरेकस्यडतरच्।वाबहूनांजातिपरिप्रश्नेडतमच्।एकाच्चप्राचां।अ
वक्षेपणेकन्।इवेप्रतिकृतौ।संज्ञायांच।लुम्मनुष्ये।जीविकार्थेचापण्ये।देवपथादिभ्यश्च॥५॥व
स्तेर्ढञ्।शिलायाढः।शाखादिभ्योयः।द्रव्यंचभव्ये।कुशाग्राच्छः।समासाच्चतद्विषयात्।शर्करा
दिभ्योऽण्।अंगुल्यादिभ्यष्ठक्।एकशालायाष्ठजन्यतरस्यां।कर्कलोहितादीकक्।प्रत्नपूर्वविश्वेमा
त्थाल्छंदसि।पूगाञ्ञ्योऽग्रामणीपूर्वात्।व्रातच्फञोरस्त्रियां।आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्रा
ह्मणराजन्यात्।वृकाट्टेण्यण्।दामन्यादित्रिगर्त्तषष्ठाच्छः।पर्श्वादियोधेयादिभ्योणञौ।अभिजिद्वि

प॰अ॰ सू॰ ४
३३

शपथे।मद्रात्परिवापणे।समासांताः।नपूजनात्।किमः क्षेपे।नञस्तत्पुरुषात्।पथो विभाषा।ब
हुव्रीहौ संख्येये डजबहुगणात्।ऋक्पूरब्धूःपथामानक्षे।अच् प्रत्यन्ववपूर्वात्सामलोम्नः।
अक्ष्णोऽदर्शनात्।अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदा
रगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुष
र्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः।ब्रह्महस्तिभ्यां वर्चसः।अवसमंधेभ्यस्तम
सः।श्वसो वसीयःश्रेयसः॥४॥अन्ववतप्ताद्रहसः।प्रतेरुरसः सप्तमीस्थात्।अनुगवमायामे।
द्विस्तावा त्रिस्तावा वेदिः।उपसर्गाध्वनः।नतत्पुरुषस्यांगुलेः संख्याव्ययादेः।अहःसर्वैकदे
शसंख्यातपुण्याच्च रात्रेः।अन्होऽन्ह एतेभ्यः।नसंख्यादेः समाहारे।उत्तमैकाभ्यां च।

श्रीः
३३

अवेः कः । यावादिभ्यः कन् । लोहितान्मणौ । वर्णेचानित्ये । रक्ते । कालाच्च । विनयादिभ्यष्ठक् । वाचो व्याहृ-
तार्थायां । तद्युक्तात्कर्मणोऽण् । ओषधेरजातौ । प्रज्ञादिभ्यश्च । मृदस्तिकन् । सस्नौ प्रशंसायां ॥ ४ ॥ वृकज्येष्ठ-
ाभ्यां तिल्तातिलौ च छंदसि । बह्वल्पार्थाच्छस्कारकादन्यतरस्यां । संख्यैकवचनाच्च वीप्सायां । प्रतियोगे
पंचम्यास्तसिः । अपादाने चाहीयरुहोः । अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः । हीयमानपापयो-
गाच्च । षष्ठ्या व्याश्रये । रोगाच्चापनयने । अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः । अरुर्मनश्चक्षु-
श्चेतोरहोरजसां लोपश्च । विभाषा साति कार्त्स्न्ये । अभिविधौ संपदा च । तदधीनवचने । देये त्रा च । देव-
मनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलं । अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच् । कृञो
द्वितीयतृतीयशंबबीजात्कृषौ । संख्यायाश्च गुणांतायाः । समयाच्च यापनायां ॥ ३ ॥ सपत्रनिष्पत्रा-
दतिव्यथने । निष्कुलान्निष्कोषणे । सुखप्रियादानुलोम्ये । दुःखात्प्रातिलोम्ये । शूलात्पाके । सत्याद-

द्विदंड्यादिभ्यश्च।प्रसंभ्यांजानुनोर्ज्ञुः।ऊर्ध्वाद्विभाषा।ऊधसोनङ्।धनुषश्च।वासंज्ञायां।जायायानिङ्।
गंधस्येदुत्पूतिसुसुरभिभ्यः।अल्पाख्यायां।उपमानाच्च।पादस्यलोपोहस्त्यादिभ्यः।कुंभपदीषुच।
संख्यासुपूर्वस्य॥७॥वयसिदंतस्यदतृ।छंदसिच।स्त्रियांसंज्ञायां।विभाषाश्यावारोकाभ्यां।
अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च।ककुदस्यावस्थायांलोपः।त्रिककुत्पर्वते।उद्विभ्यांकाकुदस्य।
पूर्णाद्विभाषा।सुहृद्दुर्हृदौमित्रामित्रयोः।उरःप्रभृतिभ्यःकप्।इनःस्त्रियां।नवृतश्च।शेषाद्विभा
षा।नसंज्ञायां।ईयसश्च।वंदितेभ्रातुः।ऋतश्छंदसि।नाडीतंत्र्योःस्वांगे।निष्प्रवाणिश्च॥८॥
पादशतस्यनस्त्रकृतवृकज्येष्ठाभ्यांसपत्रान्ववरदार्यानन्दुःसुभ्योवयसिविंशतिः॥
॥ ॥इतिपाणिनिसूत्रेपंचमाध्यायस्यचतुर्थःपादः॥ ॥५॥४॥ ॥पंचमाध्यायःसमाप्तः॥ श्रीः
श्रीवेदव्यासायनमः॥एकाचोद्वेप्रथमस्य।अजादेर्द्वितीयस्य।नन्द्राःसंयोगादयः।पूर्वोभ्यासः।

१४

राजाहःसखिभ्यष्टच्। गोरतद्धितलुकि। अग्राख्यायामुरसः। अनोश्मायःसरसांजातिसंज्ञयोः।
ग्रामकौटाभ्यांचतक्ष्णः। अतेःशुनः। उपमानादप्राणिषु। उत्तरमृगपूर्वाच्चसक्थ्नः। नावोद्विगोः।
अर्द्धाच्च।।५।।खार्याःप्राचां। द्वित्रिभ्यामंजलेः। अनसंतान्नपुंसकाच्छंदसि। ब्रह्मणोजानपदाख्या
यां। कुमहद्भ्यामन्यतरस्यां। द्वंद्वाच्चुदषहांतात्समाहारे। अव्ययीभावेशरत्प्रभृतिभ्यः। अनश्च। नपुं
सकादन्यतरस्यां। नदीपौर्णमास्याग्रहायणीभ्यः। झयः। गिरेश्चसेनकस्य। बहुव्रीहौसक्थ्यक्ष्णोः
स्वांगात्षच्। अंगुलेर्दारुणि। द्वित्रिभ्यांषमूर्ध्नः। अप्पूरणीप्रमाण्योः। अंतर्बहिर्भ्यांचलोम्नः। अ
नासिकायाःसंज्ञायांनसंचास्थूलात्। उपसर्गाच्च। सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदा
जपदप्रोष्ठपदाः।।६।।नञ्दुःसुभ्योहलिसक्थ्योरन्यतरस्यां। नित्यमसिच्प्रजामेधयोः। बहुप्र
जाश्छंदसि। धर्मादनिच्केवलात्। जंभासुहरिततृणसोमेभ्यः। दक्षिणेर्मालुब्धयोगे। इच्कर्मव्यतीहारे।